# Shri Varadarajastavah 2

# શ્રીવરદરાજસ્તવઃ ૨

## Document Information

Text title : varadarAjastavaH 2

File name : varadarAjastavaH2.itx

Category : vishhnu, appayya-dIkShita

Location : doc_vishhnu

Author : Sri Appayya Dixitar

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીવરદરાજસ્તવઃ ૨

અપ્પય્યદીક્ષિતેન્દ્રવિરચિતઃ ।
(કાઞ્ચ્યાં વરદરાજક્ષેત્રે)

ઉદ્ઘાટ્ય યોગકલયા હૃદયાબ્જકોશં
ધન્યૈશ્ચિરાદપિ યથારુચિ ગૃહ્યમાણઃ ।
યઃ પ્રસ્ફુરત્યવિરતં પરિપૂર્ણરૂપઃ
શ્રેયઃ સ મે દિશતુ શાશ્વતિકં મુકુન્દઃ ॥ ૧॥

જાતો ન વેત્તિ ભગવન્ન જનિષ્યમાણઃ
પારં પરં પરમપૂરુષ તે મહિમ્નઃ ।
તસ્ય સ્તુતૌ તવ તરઙ્ગિતસાહસિક્યઃ
કિં માદૃશો બુધજનસ્ય ભવેન્ન હાસ્યઃ ॥ ૨॥

મન્યે નિજસ્ખલનદોષમવર્જનીય-
મન્યસ્ય મૂર્ધ્નિ વિનિવેશ્ય બહિર્બુભૂષુઃ ।
આવિશ્ય દેવ રસનાનિ મહાકવીનાં
દેવી ગિરામપિ તવ સ્તવમાતનોતિ ॥ ૩॥

નેતસ્તથાપિ તવ નિર્મમલોકસેવ્યાં
મૂર્તિં મદાવલમહીધરરત્નભૂષામ્ ।
વૈકુણ્ઠ વર્ણયિતુમસ્મિ ધૃતાભિલાષઃ
ત્વન્નામરૂપગુણચિન્તનલાભલોભાત્ ॥ ૪॥

મન્યે સૃજન્ત્વભિનુતિં કવિપુઙ્ગવાસ્તે
તેભ્યો રમારમણ માદૃશ એવ ધન્યઃ ।
ત્વદ્વર્ણને ધૃતરસઃ કવિતાતિમાન્દ્યાત્
યસ્તત્તદઙ્ગચિરચિન્તનભાગ્યમેતિ ॥ ૫॥

કાઞ્ચી મહાર્ઘમણિકાઞ્ચનધામચિત્રા
વિશ્વમ્ભરાં વિબુધનાથ વિભૂષયન્તી ।

ભાતા ગજાદ્રિશિખરે તવ ભક્તચિન્તા-
રત્નેન રાજતિતરાં શુભવિગ્રહેણ ॥ ૬॥

અસ્યાં ભવન્તમભિતઃ સ્થિતદુગ્ધસિન્ધૌ
મધ્યે ત્રયીમય મહારવિમણ્ડલસ્ય ।
પશ્યન્નધઃકૃતચતુર્મુખવિષ્ટપાયાં
ધામત્રયેઽપિ કુતુકં વિજહાતિ વિદ્વાન્ ॥ ૭॥

અસ્યામમેયગુણપુર્યપરાજિતાયાં
અશ્વત્થવર્યજુષિ દિવ્યસરઃસમીપે ।
મધ્યે હિરણ્મયગૃહં મહિષીયુતં ત્વાં
દૃષ્ટ્વા જનો ન પુનરેતિ ભવાન્તરાર્તિમ્ ॥ ૮॥

સમ્પ્રાપ્ય દુગ્ધતટિનીવિરજાં વિશુદ્ધાઃ
સન્તો ભવદ્ભજનદાં પદમાગતાસ્તે ।
ત્વત્પાદતોયતુલસીકુસુમેષુ લગ્નં
ગન્ધં રસં ચ ગરુડધ્વજ તે લભન્તે ॥ ૯॥

સૌવર્ણસાલવલયાન્ સમનુપ્રવિશ્ય
કોશાનિવ ત્રિદશનાયક કોઽપિ ધન્યઃ ।
આનન્દવલ્લ્યુદિતદિવ્યફલાનુરૂપં
રૂપં ત્વદીયમવલોકયતેઽભિરૂપમ્ ॥ ૧૦॥

માતઙ્ગશૈલમણિશ‍ૃઙ્ગમહાવિમાન
સોપાનપર્વચતુરુત્તરવિંશતિર્વા ।
તામેવ તત્ત્વવિતતિં પુરુષો વિલઙ્ઘ્ય
પશ્યન્ભવન્તમુપયાતિ ભવાબ્ધિપારમ્ ॥ ૧૧॥

નાપારિ લબ્ધુમરવિન્દભુવાઽપિ સાક્ષાદ્-
યં પૂર્વમીશ્વર વિના હયમેધપુણ્યમ્ ।
અન્યૈરનાપ્ય સ કથં તવ પુણ્યકોટિં
પ્રાપ્યસ્ત્વદાકૃતિવિલોકનજઃ પ્રમોદઃ ॥ ૧૨॥

પ્રત્યઙ્મુખં તવ ગજાચલરાજરૂપં
પ્રત્યઙ્મુખાશ્ચિરતરં નયનૈર્નિપીય ।
અસ્થાનમાપ્તવચસામવિતર્કણીય-
માશ્ચર્યમેતદિતિ નિશ્ચયમાવહન્તે ॥ ૧૩॥

યસ્મિઞ્જહાત્યતિશયોક્તિરલઙ્કૃતિત્વં
    ન્યૂનોપમાત્વમુપમા સમુપૈતિ સર્વા ।
સૂક્ષ્મસ્વભાવકલનાપિ ચ ન પ્રતર્ક્યા
    તદ્વર્ણયામિ ભવતઃ કથમાભિરૂપ્યમ્ ॥ ૧૪॥

લક્ષ્મ્યાઃ પ્રિયોઽસિ રતિકેલિકૃતઃ પિતાસિ
    વિશ્વૈકમોહનરસસ્ય ચ દેવતાઽસિ ।
આવાસભૂમિરસિ સર્વગુણોત્તમાનાં
    વૈકુણ્ઠ વર્ણયતુ કસ્તવ રૂપરેખામ્ ॥ ૧૫॥

સર્વોત્તરોઽસિ સકલત્રિદશાશ્રયોઽસિ
    જ્યોતિશ્છટાઘટિતચક્રપરિષ્કૃતોઽસિ ।
શ‍ૃઙ્ગારશેવધિરસિ દ્વિપશૈલમૌલે
    કલ્યાણરૂપ ઇતિ કસ્ત્વયિ ચિત્રવાદઃ ॥ ૧૬॥

અઙ્ગાનિ તે નિખિલલોકવિલોચનાનાં
    સમ્ભાવનીયગુણસંસરણાનિ સત્યમ્ ।
યેષ્વેકમાપ્ય ન પુરાઽધિગતં સ્મરન્તિ
    વાઞ્છન્તિ નાન્યદપિ લબ્ધુમદો વિહાય ॥ ૧૭॥

એકત્ર મન્મથમજીજનદિન્દરાયાં
    પૂર્વં ભવાનિતિ બુધા કિમપૂર્વમાહુઃ ।
અદ્યાપિ તં ન જનયસ્યરવિન્દનાભ
    કાસુ પ્રસન્નમધુરસ્મિતકામિનીષુ ॥ ૧૮॥

નિક્ષિપ્ય હૃત્ત્વયિ પુનર્લભતે ન કોઽપિ
    નિર્યાત ઇત્યધિપ ન ત્વયિ ચિત્રમેતત્ ।
હત્વા હઠાન્મૃગદૃશાં હૃદયાનિ યસ્ત્વ-
    મેવં નિલીય કિલ તિષ્ઠસિ શૈલશ‍ૃઙ્ગે ॥ ૧૯॥

મોહં જગત્ત્રયભુવામપનેતુમેત-
    દાદાય રૂપમખિલેશ્વર દેહભાજામ્ ।
નિસ્સીમકાન્તિરસનીરધિનાઽમુનૈવ
    મોહં વિવર્ધયસિ મુગ્ધવિલોચનાનામ્ ॥ ૨૦॥

ઉચ્છેદમેકવિષયાત્કથયન્તિ બોધાન્

મોહસ્ય યે ખલુ કથં ન મૃષાવદાસ્તે ।
લાવણ્યમીશ તવ યન્નયનૈર્નિપીય
તત્રૈવ મોહમધિકં દધતે તરુણ્યઃ ॥ ૨૧॥

શુભ્રાંશુવક્ત્ર શુભગોચરલાભતોષાત્
સમ્પ્રસ્થિતો મૃગદૃશાં નયનામ્બુજૌઘઃ ।
ત્વદ્ભાસરિત્યથ બિભર્તિ મોહં
પ્રાયઃ ફલન્તિ વિફલન્તિ ચ દૈવચિન્તાઃ ॥ ૨૨॥

યત્પ્રાણસંયમજુષાં યમિનાં મનાંસિ
મૂર્તિં વિશન્તિ તવ માધવ કુમ્ભકેન ।
પ્રત્યઙ્ગમૂર્છદતિવેલમહાપ્રવાહ-
લાવણ્યસિન્ધુતરણાય તદિત્યવૈમિ ॥ ૨૩॥

લાવણ્ય સાગરભુવિ પ્રણયં વિશેષાદ્-
દુગ્ધામ્બુરાશિદુહિતુસ્તવ તર્કયામિ ।
યત્તાં બિભર્ષિ વપુષા નિખિલેન લક્ષ્મી-
મન્યાં તુ કેવલમધોક્ષજ વક્ષસૈવ ॥ ૨૪॥

સારસ્વતં વદનપદ્મભુવં પ્રવાહં
ત્રૈસ્રોતસં ચ તવ પાદભુવં નિરીક્ષ્ય ।
સર્વપ્રતીકનિકરાત્પ્રવહન્ત્યજસ્ર-
મીર્ષ્યાવતીશ યમુના કિમુ કાયકાન્તિઃ ॥ ૨૫॥

આપૂરિતત્રિભુવનોદરમંશુજાલં
મન્યે મહેન્દ્રમણિવૃન્દમનોહરં તે ।
ત્વદ્રાગદીપિતહૃદાં ત્વરિતં વધૂનાં
પ્રાપ્તે સરિત્સહચરં પ્રલયેઽભિવૃદ્ધમ્ ॥ ૨૬॥

યુક્ત્યાઽઽગમેન ચ ભવાન્ શશિવર્ણ એવ
નિષ્કૃષ્ટસત્ત્વગુણમાત્રવિવર્તભૂમિઃ ।
ધત્તે કૃપામ્બુભરતસ્ત્વિષમૈન્દ્રનીલીં
શુભ્રોઽપિ સામ્બુરસિતઃ ખલુ દૃશ્યતેઽબ્દઃ ॥ ૨૭॥

સર્વાતિશાયિસહજદ્યુતિભૂષિતસ્ય
વિશ્વૈકનાયક વિભૂષણધારણં તે ।
આબદ્ધસૌહૃદમપારસુખામ્બુરાશેઃ

વીક્ષે તવૈવ વિષયાદિકુતૂહલેન ॥ ૨૮॥

મધ્યે સ્ફુરન્મકરતોરણમણ્ડલસ્ય
ચામીકરાભરણભૂષિતસર્વગાત્રઃ ।
આદિત્યબિમ્બગતમાપ્રપદાત્સુવર્ણં
ભાસા ભવાનનુકરોતિ ભવન્તમેવ ॥ ૨૯॥

સેવારસાગતસુરાધ્નુબિમ્બદૃશ્યં
ભૂષામણિપ્રકરદર્શિતસર્વવર્ણમ્ ।
ત્વાં વિશ્વરૂપવપુષેવ જનં સમસ્તં
પશ્યામિ નાગગિરિનાથ કૃતાર્થયન્તમ્ ॥ ૩૦॥

શ‌ૃઙ્ગીસુવર્ણરુચિપિઞ્જરિતૈકભાગા-
ન્યઙ્ગેષુ દેવ તવ ભૂષણમૌક્તિકાનિ ।
પ્રત્યક્ષયન્તિ ભવતઃ પ્રતિરોમકૂપ-
વિશ્રાન્તિસાન્દ્રજગદણ્ડસહસ્રશોભમ્ ॥ ૩૧॥

આબદ્ધપઙ્ક્તિમહિતાનિ તવ ત્રિધામન્
વીધ્રાણિ હીરશકલાનિ વિભૂષણેષુ ।
સમ્મોહનાનિ સરસીરુહલોચનાનાં
મન્ત્રાક્ષરાણિ કલયે મકરધ્વજસ્ય ॥ ૩૨॥

આપાદમૌલિવિધૃતેષુ વિભાન્તિ દેવ
સ્થૂલેન્દ્રનીલમણયો મણિભૂષણેષુ ।
રાગાદુપેત્ય તવ સુન્દર તત્તદઙ્ગ-
લગ્નાનિ લોકસુદૃશામિવ લોચનાનિ ॥ ૩૩॥

ત્વાં વીક્ષ્ય મુક્તિદ  જનાસ્તરણિં સખાયં
ભિન્દ્યુઃ કિલેતિ તવ ભૂષણપદ્મરાગાઃ ।
શઙ્કે ચિરં જનદૃશઃ સ્વકરૈઃ ક્ષિપન્તિ
તન્માત્રતોઽપિ તવ મુક્તિદતામબુદ્ધ્વા ॥ ૩૪॥

પાદાવુપેન્દ્ર સુકુમારતમાવિમૌ તે
ભૂષાભરાદરુણિમાનમિવોદ્વમન્તૌ ।
ઇત્થં કિમસ્તિ સુકુમારમિતીવ બોદ્ધું
લોકત્રયેઽપિ ચ કરૈઃ સ્પૃશતઃ પદાર્થાન્ ॥ ૩૫॥

મૂર્તિં પ્રસાધયતિ તે ચરણાંશુપુઞ્જઃ
      તાં જૈમિનિઃ કથમધીશ નિરાકરોતુ ।
સર્વત્ર યોગમુપપાદયતાઽરુણિમ્નઃ
      તેનારુણાધિકરણે હિ મુનિઃ સ ભગ્નઃ ॥ ૩૬॥

અન્તસ્તમાંસિ યમિનામપસારયન્તી
      હૃત્પઙ્કજાન્યપિ ચ નાથ વિકાસયન્તી ।
ભક્તપ્રવેકભવવારિનિધેસ્તરણ્યોઃ
      ત્વત્પાદયોર્જયતિ કાઽપિ મયૂખમાલા ॥ ૩૭॥

મુષ્ણન્પ્રભાતસમયેષુ મુરાન્તકારિન્
      અઙ્ઘ્રિદ્વયશ્રિયમહસ્કરતસ્કરસ્તે ।
યત્પ્રાપ્યતે ન કરભઙ્ગમમુષ્ય બાલ-
      મિત્રત્વમેવ મિષતિ ધ્રુવમત્ર હેતુઃ ॥ ૩૮॥

અઙ્ઘ્રિદ્વયસ્ય તવ સન્તતમન્તરઙ્ગ-
      મમ્ભોજવર્ગમિહ યોજયતિ શ્રિયા યત્ ।
ઉત્કોચદાનમિદમુષ્ણકરસ્ય બાલ્યાત્
      તત્કાન્તિરત્નચયચોરણતત્પરસ્ય ॥ ૩૯॥

ભાનુર્નિશાસુ ભવદઙ્ઘ્રિમયૂખશોભા
      લોભાત્પ્રતાપ્ય કિરણોત્કરમાપ્રભાતમ્ ।
તત્રોદ્ધૃતે હુતવહાત્ક્ષણલુપ્તરાગે
      તાપં ભજત્યનુદિનં સ હિ મન્દતાતઃ ॥ ૪૦॥

તૌલ્યં વદન્તુ કવયસ્તરુપલ્લવાનાં
      મુગ્ધાસ્ત્વદીયચરણેન મુકુન્દ કિં તૈઃ ।
તાન્યેવ તત્તદધરોષ્ઠમિષાત્તદાનીં
      કમ્પં ભજન્તિ કથયન્તિ કિલાત્મનૈચ્યમ્ ॥ ૪૧॥

પદ્મોપમાત્પદયુગાત્તવ રત્નગર્ભા-
      જ્જાતેતિ પદ્મસદૃશાકૃતિમાહુરેનામ્ ।
કાર્યં હિ કારણગુણાનતિવર્તિ લોકે
      પ્રાયઃ પતઙ્ગપતિવાહ વિલોકયામઃ ॥ ૪૨॥

કલ્યાણશાલિકમલાકરલાલનીય-
      માસેવકશ્રુતિમનોહરનાદિ હંસમ્ ।

આમોદમેદુરમરુન્નમિતાલિકાન્તં
    શઙ્કે તવેશ્વર પદં શતપત્રમેવ ॥ ૪૩॥

સ્પર્શં યયોઃ સમધિગમ્ય ઝટિત્યહલ્યા
    દેવી ચ ભૂરભવદુજ્ઝિતસર્વપઙ્કા ।
તાભ્યાં ઘટેત સમતા ભવતઃ પદાભ્યાં
    આજન્મપઙ્કવસતેઃ કથમમ્બુજસ્ય ॥ ૪૪॥

માતઙ્ગશૈલમણિશેખર તે પદાભ્યાં
    મોહેન સામ્યમનુચિન્ત્ય કૃતાપરાધમ્ ।
શઙ્કે સરોજમનયોરુભયોરુપેત્ય
    રેખાચ્છલેન સતતં વિદધાતિ સેવામ્ ॥ ૪૫॥

લેખાધિનાથવનપલ્લવધૈર્યચોરે
    રેખામયં પદતલે કમલં યદેતત્ ।
તત્રૈવ વિશ્રમજુષોઽચ્યુતરાગલક્ષ્મ્યાઃ
    ક્રીડાનિશાન્તકમલં તદિતિ પ્રતીમઃ ॥ ૪૬॥

યસ્યાઃ સ્વમૂર્ત્યનુગુણાકૃતિશક્તિયુક્તઃ
    પાદામ્બુજદ્વયમિષાત્કમઠાધિરાજઃ ।
મૂલે વસત્યુચિતમેવ નિગદ્યતે સા
    મૂર્તિર્મહાપુરુષ તેઽખિલલોકરૂપા ॥ ૪૭॥

કિં દ્વાદશાત્મનિ રવૌ ભગવન્ધૃતેર્ષ્યઃ
    ચન્દ્રસ્તતોઽપ્યધિકતામધિગન્તુમેવ ।
એતે તવેહ દશ ભાન્તિ પદાઙ્ગુલીષુ
    સ્વાત્માન ઇત્યજનિ ચિત્તદૃગર્ણવેભ્યઃ ॥ ૪૮॥

ભાસા પદં તવ રમાધિપ ભૂષયન્તિ
    સંસેવકાંશ્ચ વિબુધાન્ પરિતોષયન્તિ ।
નાથ ક્ષિપન્તિ ચ તમાંસિ નખેન્દવસ્તે
    સંશોષયન્ત્યપિ તુ ભક્તભવામ્બુરાશિમ્ ॥ ૪૯॥

ગઙ્ગાચ્છલેન તવ નિઃસૃતમૂર્ધ્વગાણ્ડ-
    સઙ્ઘટ્ટનાત્પદનખાગ્રમયૂખલેશમ્ ।
આલોક્ય નૂનમમરાઃ પતિતં પયોધા-
    વામથ્ય તં જગૃહુરીશ તદિન્દુરૂપમ્ ॥ ૫૦॥

પાદાનમત્સુરશિરોમણિપદ્મરાગાન્
　　સદ્યઃ સ્ફુરત્સહજરુક્પ્રકરાન્કરાગ્રૈઃ ।
મુક્તામયાન્વિદધતાં પ્રકટં મુરારે
　　જૈવાતૃકત્વમુચિતં નનુ તે નખાનામ્ ॥ ૫૧॥

યત્તે પદામ્બુરુહમમ્બુરુહાસનેડ્યં
　　ધન્યાઃ પ્રપદ્ય સકૃદીશ ભવન્તિ મુક્તાઃ ।
નિત્યં તદેવ ભજતામતિમુક્તલક્ષ્મી-
　　યુક્તૈવ દિવ્યમણિનૂપુરમૌક્તિકાનામ્ ॥ ૫૨॥

નાથ ત્વદઙ્ઘ્રિનખધાવનતોયલગ્નાઃ
　　તત્કાન્તલેશકણિકાજલધિં પ્રવિષ્ટાઃ ।
તા એવ તસ્ય મથનેન ઘનીભવન્ત્યો
　　નૂનં સમુદ્રનવનીતપદં પ્રપન્નાઃ ॥ ૫૩॥

સવ્યાપસવ્યશરમોક્ષકૃતીક્ષુધન્વા
　　જઙ્ઘે તવ સ્વશરધી ઇતિ સન્દિહાનઃ ।
આલોકતેઽઙ્ઘ્રિકટકોદ્ધતરુક્છલેન
　　ન્યસ્યાભિતો નિજશરાનનુરૂપભાવમ્ ॥ ૫૪॥

જાનુદ્વયં તવ જગત્ત્રયનાથ મન્યે
　　મારસ્ય કેલિમણિદર્પણતામુપેતમ્ ।
આલોકયન્ યદવદાતમનોજ્ઞવૃત્તં
　　રૂપં નિજં કલયતે વિપરીતમેષઃ ॥ ૫૫॥

ઊરોઃ કિમન્યદયતામુપમાનભાવં
　　વામસ્ય દક્ષિણમમુષ્ય ચ તં વિહાય ।
રમ્ભાદયઃ સદૃશ ઇત્યુચિતં કિમેતદ્-
　　યસ્યોર્વશી સુભગ સાઽપિ વિભૂતિલેશઃ ॥ ૫૬॥

નાથ ત્વયા પરિહિતં વરવર્ણિનીનાં
　　રાગસ્ય યદ્વસનમાસ્પદતાં બિભર્તિ ।
સૌન્દર્યસારનિલયેન કટીતટેન
　　તસ્યૈવ કિન્નુ મહિમા પરિશીલનસ્ય ॥ ૫૭॥

સમ્પ્રાપ્ય સારસનમધ્યતલોદયાદ્રિં

મધ્યામ્બરં મસૃણયન્નરુણૈર્મયૂખૈઃ ।
સંવીક્ષ્યતે સુકૃતિભિર્મણિરેષ પૂષા
સંસારરાત્ર્યુપરતિં ગતવદ્ભિરેવ ॥ ૫૮॥

નાભેરભૂત્તવ ચતુર્ભુજ નાન્તરિક્ષં
યન્નાભિરેવ યદુનેતરિયં તતોઽભૂત્ ।
નાભ્યા ઇતિ શ્રુતિવિપર્યયગે વિભક્તી
તાં જૈમિનેરનુસસાર પશોશ્ચ સૂત્રમ્ ॥ ૫૯॥

આરોપમધ્યવસિતિં ચ વિના તવાસ્યાં
નાભૌ સરઃપદમુપૈતિ કથં નુ વૃત્તિમ્ ।
સાક્ષાદિયં સરસિજસ્ય સમુદ્રશાયિન્
ઉત્પત્તિભૂરિતિ હિ નાયક નાયમૂહઃ ॥ ૬૦॥

કલ્પાન્તરેષુ વિતતિં કમલાસનાનાં
ભૂયોઽપિ કર્તુમિવ ભૂરિ રજો દધાનમ્ ।
નાભિહ્રદે સમુદિતં નલિનં તવૈત-
દ્ભૂયાત્સદૈવ મમ ભૂતિકરં મુરારે ॥ ૬૧॥

ઉલ્લાસયત્યુદરબન્ધનિબદ્ધદિવ્ય-
શોણાશ્મરશ્મિકલિકાવલિરચ્યુતૈષા ।
આગામ્યનેકશતકલ્પવિધાતૃગર્ભ-
નાભ્યુદ્ગતામ્બુરુહકુટ્મલપઙ્ક્તિશોભામ્ ॥ ૬૨॥

ઊર્ધ્વં વિરિઞ્ચિભવનાત્તવ નાભિપદ્મા-
દ્રોમાવલીપદજુષસ્તમસઃ પરસ્તાત્ ।
મુક્તૌઘમણ્ડિતમુરઃસ્થલમુન્મયૂખં
પશ્યામિ દેવ પરમં પદમેવ સાક્ષાત્ ॥ ૬૩॥

સાલૈરુદંશુચયરત્નલલન્તિકાઢ્યૈઃ
સ્ફીતોલ્લસત્કુસુમયા વનમાલયા ચ ।
વિભ્રાજતે વિપુલમેનદુરસ્ત્વદીય-
મન્તઃપુરં જલધિરાજકુમારિકાયાઃ ॥ ૬૪॥

પ્રાલમ્બિકામુપગતાસ્તવ પદ્મરાગાઃ
પ્રત્યગ્રઘર્મકરમણ્ડલનિર્વિશેષાઃ ।
પર્યઙ્કે વરદ વક્ષસિ ભાન્તિ લક્ષ્મ્યાઃ

ક્રીડોપબર્હતિલકા ઇવ પાર્શ્વભાજઃ ॥ ૬૫॥

અસ્તુ ત્રયીમયતનુસ્તવ લમ્બનાલી-
રત્નૈસ્તિરસ્ક્રિયત એવ તથાઽપિ ભાનુઃ ।
સોઢઃ સતાં બત નિશાન્તમુપાગતાનાં
એવં તિરસ્કૃદીશ્વર કઃ સમર્થઃ ॥ ૬૬॥

નષ્ટેઽપિ ભસ્મનિ વને ગિરિશેન દગ્ધં
સ્ત્રીણાં હૃદીશ મદનં પ્રતિબોધયન્તઃ ।
ભસ્મોચ્ચયે કૃતકચપ્રતિબોધનં તં
શુક્રં જયન્તુ ન કથં તવ હારતારાઃ ॥ ૬૭॥

ઉત્પ્રેક્ષયત્યધિભુજાન્તરમુલ્લસન્તી
પાર્શ્વદ્વયે પરમપૂરુષ હારમાલા ।
તત્રત્યકાન્તિસરિતસ્તરલૈઃ પ્રણુન્નાં
ઊર્મ્યુત્કરૈરુભયતઃ સિતફેનપઙ્ક્તિમ્ ॥ ૬૮॥

ત્વાં સર્વભૂતમયમાશ્રિતસર્વવર્ણં
યદ્વૈજયન્ત્યુપગતાચ્યુત સર્વગન્ધમ્ ।
તેનૈવ કિં ત્રિભુવનૈકમહાવદાન્ય-
સારૂપ્યમાવહતિ તે સકલાભિનન્દ્યમ્ ॥ ૬૯॥

તારાભિરામપરિણાહલસત્સિતાભ્રં
તાપિઞ્છમેચકમુરઃ શરદન્તરિક્ષમ્ ।
પ્રાપ્યૈવ દેવ તવ કૌસ્તુભપૂર્ણચન્દ્રઃ
પૂર્ણાં બિભર્તિ પુરુષોત્તમ કાન્તિરેખામ્ ॥ ૭૦॥

નાભી સરોજકિરણૈર્મણિરાજભાભિઃ
આત્મપ્રભાભિરપિ સંવલિતં વિભાતિ ।
શ્રીવત્સવિગ્રહજુષઃ પ્રકૃતેસ્ત્વદીયં
વક્ષઃ પરીતમિવ સત્ત્વરજસ્તમોભિઃ ॥ ૭૧॥

વક્ષઃસ્થલં વરદ નન્દનમાશ્રિતસ્તે
યેષાં વિભાતિ હરિચન્દન એવ મધ્યે ।
એતે ચતુર્ભુજ ભુજાસ્તવ તસ્ય શાખાઃ
શઙ્કે કરાબ્જદલકોમલિતાગ્રભાગાઃ ॥ ૭૨॥

જાત્યૈવ યદ્વરદ પલ્લવરાગ એષ
    યલ્લાલ્યતે ચ ભવતા કટકે નિવેશ્ય ।
મન્યે મણિસ્તદુપગમ્ય મદાન્ધભાવં
    સાક્ષાદયં સવિતુરેવ કરોત્યવજ્ઞામ્ ॥ ૭૩॥

ઐન્દ્રોપલપ્રભમધો ભુજદણ્ડનાલં
    એકત્ર ચક્રમપરત્ર ચ શઙ્ખહંસમ્ ।
દૃષ્ટ્વા કથં ન કલયેમહિ કાન્તિસિન્ધોઃ
    ઉત્ફુલ્લપદ્મયુગમૂર્ધ્વકરદ્વયં તે ॥ ૭૪॥

ચન્દ્રાર્કચારુતરશઙ્ખરથાઙ્ગશોભા
    સમ્ભાવ્યરાત્રિદિવસાત્મકપાર્શ્વયુગ્મમ્ ।
નક્ષત્રદૃશ્યનવમૌક્તિકહારિરૂપં
    મન્યે મહાપુરુષરૂપધરં ભવન્તમ્ ॥ ૭૫॥

સંવર્તજૃમ્ભિતવિકર્તનદુર્નિરીક્ષં
    પશ્યામિ દક્ષિણકરે તવ ચક્રરાજમ્ ।
દૈત્યૌઘસિન્ધુપતિમન્થમહાચલસ્ય
    બાહોઃ પ્રતાપઘનમિદ્ધમિવોદ્ધતં તે ॥ ૭૬॥

આભાતિ દેવ વિધૃતસ્તવ સવ્યપાણૌ
    અન્તર્બહિશ્ચ શુચિરચ્યુત પાઞ્ચજન્યઃ ।
અન્તેવસન્નિવ ગલસ્ય ગુરોર્ગભીર
    ધ્યાનક્રિયોપનિષદધ્યયનાર્થમેષઃ ॥ ૭૭॥

કૌમોદકી સ્ફુરતિ તે કરપલ્લવાગ્રે
    વૈરિઞ્ચવાક્યવિકૃતેવ સરસ્વતી સા ।
ત્રિસ્રોતસસ્તવ પદાબ્જભુવો વિશેષં
    આકાઙ્ક્ષ્ય પાણિકમલાત્તવ નિસ્સરન્તી ॥ ૭૮॥

હસ્તે વિરાજતિ તવાભયમુદ્રિતેઽસ્મિન્
    અવ્યાજકોમલરુચિપ્રકરાભિરામે ।
વજ્રોર્મિકાંશુનિકરઃ કમલાધિરાજ્ય
    પટ્ટાભિષેકસલિલૌઘ ઇવાવદાતઃ ॥ ૭૯॥

નામૈવ તે વરદ વાઞ્છિતદાતૃભાવં
    વ્યાખ્યાનતો ન વહસે વરદાનમુદ્રામ્ ।

ન હ્યાગમોદિતરસઃ શ્રુતિસિદ્ધમર્થં
    લિઙ્ગેન બોધ્યમુરરીકુરુતે વિપશ્ચિત્ ॥ ૮૦॥

આભાતિ મૌક્તિકગુણગ્રથિતૈરનલ્પૈઃ
    નીલોત્પલૈર્વલયિતસ્તવ નાથ કણ્ઠઃ ।
સંવર્તમેઘવસતિં ધ્વનનૈસ્તદન્તૈઃ
    નિશ્ચિત્ય તન્નિકટગૈરિવ મેઘડિમ્ભૈઃ ॥ ૮૧॥

યદ્બ્રહ્મણશ્ચ જનિભૂઃ પ્રિયમિન્દરાયાઃ
    સસ્પર્ધમોષધિપતૌ ચ સકર્ણિકં ચ ।
એતૈર્ગુણૈર્ગુણનિધે કતમસ્ત્વદીયં
    વક્ત્રં મનોજ્ઞમવગચ્છતુ નારવિન્દમ્ ॥ ૮૨॥

વક્ત્રેણ તે યદભિભૂતમભૂત્સરોજં
    તન્નાભિભૂતમિતિ શબ્દમવાચ્યનૂનમ્ ।
શબ્દચ્છલાદપનિનીષુ જનાપવાદં
    નાભેરભૂત્તવ રમાધિપ વિશ્રુતાયઃ ॥ ૮૩॥

ઉન્મીલયન્કુમુદમુજ્જ્વલયન્ ગિરીશં
    ઉન્મૂલયન્વિષમવાહભવાભિતાપમ્ ।
ઉદ્દીપયન્વરવધૂજનતાનુરાગં
    ઉદ્યોતતે વરદ તે વદનામૃતાંશુઃ ॥ ૮૪॥

પક્ષદ્વયક્રશિમપોષવિભાવ્યમાન-
    ચાન્દ્રાયણવ્રતનિષેવણ એષ નિત્યમ્ ।
કુર્વન્પ્રદક્ષિણમુપેન્દ્ર સુરાલયં તે
    લિપ્સુર્મુખાબ્જરુચિમેવ તપસ્યતીન્દુઃ ॥ ૮૫॥

નાથ ત્વદીયમકલઙ્કમિમં મુખેન્દું
    આપીય તૃપ્યતિ સદા વસુધા યતસ્તે ।
તેનૈવ કિં નવસુધારસગોચરોઽભૂત્
    ઇન્દુઃ કલઙ્કમલિનીકૃતમધ્યભાગઃ ॥ ૮૬॥

આશ્રિત્ય નૂનમમૃતદ્યુતયઃ પદં તે
    દેહક્ષયે વિધૃતદિવ્યપદાભિમુખ્યાઃ ।
લાવણ્યપુણ્યનિચયં સુહૃદિ ત્વદાસ્યે
    વિન્યસ્ય યાન્તિ મિહિરં પ્રતિમાસભિન્નાઃ ॥ ૮૭॥

ત્વદ્વક્ત્રસામ્યમયમમ્બુજકોશમુદ્રા-
      ભઙ્ગાત્તતત્સુષમમિત્રકરોપક્લૃપ્ત્યા ।
લબ્ધ્વાઽપિ પર્વણિ વિધુઃ ક્ષમહીયમાનઃ
      શંસત્યનીત્યુપચિતાં શ્રિયમાશુનાશામ્ ॥ ૮૮॥

દૃગ્ભ્યાં મુકુન્દ મૃગલોચનકોમલાભ્યાં
      જાતાધિકદ્યુતિ વિલોક્ય તવાનનાબ્જમ્ ।
મન્યે સ્વમણ્ડલમિતોઽપ્યધિકં વિધિત્સુઃ
      તસ્મિન્બિભર્તિ મૃગમેવ જડઃ સિતાંશુઃ ॥ ૮૯॥

માલિન્યમબ્જશશિનોર્મધુલિટ્કલઙ્કૌ
      ધત્તો મુખે તુ તવ દૃક્તિલકાત્મનાઽઽભામ્ ।
દોષાવતઃ ક્વચન મેલનતો ગુણત્વં
      વક્તુર્યથેશ વચસિ ભ્રમવિપ્રલમ્ભૌ ॥ ૯૦॥

આમોદકાન્તભૃદહર્નિશમેકરૂપં
      આસેવિતં દ્વિજગણૈર્દિવિષદ્ગણૈશ્ચ ।
અઙ્કાધિરૂઢસહજશ્રિ મુખં ત્વદીયં
      શઙ્કામહે વરદ સંહતમબ્જયુગ્મમ્ ॥ ૯૧॥

બિમ્બસ્તવાયમધરઃ પ્રતિબિમ્બનેન
      યુક્તં સદા યુવતિમાનસદર્પણેષુ ।
બિમ્બાધરઃ કવિભિરીશ્વર વર્ણ્યસે ત્વં
      એતાવતૈવ ન તુ તુચ્છફલોપમાનાત્ ॥ ૯૨॥

વિદ્યામયેષુ તવ નિઃશ્વસિતેષ્વપૂર્વં
      વિદ્યાવિશેષમિવ શિક્ષિતુમન્તરાત્મન્ ।
વાણ્યાઃ સદા તવ મુખામ્બુરુહે વસન્ત્યાઃ
      કાયપ્રભેવ લસતિ સ્મિતચન્દ્રિકા તે ॥ ૯૩॥

તાપત્રયૌષધવરસ્ય તવ સ્મિતસ્ય
      નિઃશ્વાસમન્દમરુતા નિબુસીકૃતસ્ય ।
એતે કડઙ્ગરચયા ઇવ વિપ્રકીર્ણા
      જૈવાતૃકસ્ય કિરણા જગતિ ભ્રમન્તિ ॥ ૯૪॥

સિદ્ધૌષધં જયતિ તેઽધરરત્નપાત્રે

તાપત્રયી ઝટિતિ મુઞ્ચતિ યેન સિક્તમ્ ।
મન્યે તુષારકિરણં ગુણલેશયોગા-
દસ્યૈવ વારિજવિલોચન કલ્કપુઞ્જમ્ ॥ ૯૫॥

આતન્વતામવયવેષુ ગતાગતાનિ
યુક્તાત્મનાં વરદ યૌવતચક્ષુષાં ચ ।
વિશ્રાન્તિભૂર્વિધુકરપ્રકરાવદાતા
મન્દસ્મિતચ્છવિરિયં તવ માં પુનાતુ ॥ ૯૬॥

નિઃશ્વાસમન્દમલયાનિલકન્દલેન
નિર્હારિણા બહુતરેણ ચ સૌરભેણ ।
નાસાપુટૌ નલિનલોચન તે મનોજ્ઞૌ
મન્યે સદૈવ મધુમાધવયોર્નિવાસૌ ॥ ૯૭॥

સઞ્ચારશાલિ તવ નિઃશ્વસિતે સમસ્ત-
વેદેતિહાસવપુષિ દ્વિપશૈલનાથ ।
નાભીસરોરુહનવારુણમણ્ડલે ચ
મન્યે મધુવ્રતકુલં મધુવિદ્યયોક્તમ્ ॥ ૯૮॥

દેહાદ્વદન્તિ જનનં મુનયસ્તિલાનાં
દેવેન્દ્રવન્દ્યચરણામ્બુજ તાવકીનાત્ ।
નારાયણૈતદુચિતં પ્રકટીકરોતિ
નાસાભિધાનમિહ દિવ્યતિલપ્રસૂનમ્ ॥ ૯૯॥

નેત્રે તવ ક્વ ભગવન્ ક્વ ચ પુણ્ડરીકં
બ્રૂતે તયોસ્તદુપમાનમથાપિ વેદઃ ।
સર્વાત્મનસ્તવ સમાધિકવસ્ત્વલાભા-
દાકાશવત્સ ખલુ સર્વગતત્વમાહ ॥ ૧૦૦॥

સામ્યભ્રમાદવિનયેન સમુન્નતસ્ય
સવ્યં તવાક્ષિ હરતિ શ્રિયમમ્બુજસ્ય ।
તસ્યાપિ તાં સમધિકાં તનુતે યદન્યદ્-
દાક્ષિણ્યમેવ દનુજાહિત તત્ર મૂલમ્ ॥ ૧૦૧॥

પદ્માનુરાગજુષિ લોહિતશુક્લકૃષ્ણાં
આસેદુષિ પ્રકૃતિમાદૃતમીનરૂપે ।
શ્રુત્યન્તભાસિનિ મદાવલશૈલનાથ

ત્વલ્લોચને ત્વયિ ચ ભાતિ ન મે વિશેષઃ ॥ ૧૦૨॥

મુક્તઃ પ્રજાપતિરયં મમ દર્શનાદિ-
ત્યન્યં વિધાતુમનસસ્તવ ભાલજાતા ।
ઘર્મામ્બુબિન્દુતતિરેવ કિરીટમૂલ-
પ્રત્યુપ્તમૌક્તિકતતિચ્છલતો વિભાતિ ॥ ૧૦૩॥

રાજન્ત્યનર્ઘમણિસઙ્ઘમયે કિરીટે
રાજીવલોચન ન નીલમણિપ્રવેકાઃ ।
આઘ્રાય ગન્ધમનિલસ્તવ કુન્તલાનાં
અન્તઃ પ્રવેષ્ટુમનસઃ પરિતો નિલીનાઃ ॥ ૧૦૪॥

આપાદમાચિકુરભારમશેષભઙ્ગં
આનન્દવૃન્દલસિતં સુદૃશામસીમમ્ ।
અન્તર્મમ સ્ફુરતુ સન્તતમન્તરાત્મન્
અમ્ભોજલોચન તવ શ્રિતહસ્તશૈલમ્ ॥ ૧૦૫॥

ઇતિ અપ્પય્યદીક્ષિતેન્દ્રવિરચિતઃ શ્રીવરદરાજસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

*Shri Varadarajastavah 2*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*